# dIpadAnam

# દીપદાનમ્

## Document Information

Text title : hanumatdIpadAnam

File name : hanumatdIpadAnam.itx

Category : hanumaana

Location : doc_hanumaana

Transliterated by : Shri Devi Kumar, refined by PSA Easwaran

Proofread by : PSA Easwaran

Description-comments : From Hanumatstutimanjari, Mahaperiaval Publication

Acknowledge-Permission: Mahaperiyaval Trust

Latest update : April 24, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 25, 2025

*sanskritdocuments.org*

# દીપદાનમ્

કવચમન્ત્રપાઠઃ-ૐ ઐં શ્રીં હ્રાં હ્રીં હ્રૂં હ્રૈં હ્રૌં હ્યેં ક્રેં
હનુમન્ પ્રકટપરાક્રમ આક્રાન્તદિઙ્મણ્ડલ
યશોધવલીકૃતજગત્ત્રિતય વજ્રદેહ જ્વલત્સૂર્યકોટિસમપ્રભ
તનુરુદ્રાવતાર લઙ્કાપુરદહન ઉદધિલઙ્ઘન દશગ્રીવશિરઃકૃન્તન
સીતાત્રાસનિવારક વાયુસુત અઞ્જનીગર્ભસમ્ભૂત
શ્રીરામલક્ષ્મણાનન્દકર કપિસૈન્યપ્રકાશ સુગ્રીવસખ્યકારણ
વાલિનિબર્હણ દ્રોણપર્વતોત્પાટન અશોકવનવિદારણ
અક્ષકાસ્યચ્છેદન વનરક્ષાકારસમૂહભઞ્જન બ્રહ્મશક્તિગ્રસન
લક્ષ્મણશક્તિભેદનનિવારણ શિશુસમાનપીન-
વાલાદિત્યસાનુગ્રસન મેઘનાદહોમવિધ્વંસન
ઇન્દ્રજિદ્વધકારણ સીતારક્ષક રાક્ષસવિદારણ
કુમ્ભકર્ણાદિવધપરાયણ શ્રીરામભક્તિતત્પર
વ્યોમદ્રુમોલ્લઙ્ઘન મહાસામર્થ્ય મહાતેજઃપુઞ્જવિરાજમાન
સ્વામિવચનસમ્પાદિત આર્જુનસંયુગસહાય ।
કુમારબ્રહ્મચારિન્ ગમ્ભીરસ્વર દક્ષિણમાર્તણ્ડ
મેરુપર્વતોત્પાટકચરણ સર્વદુષ્ટનિબર્હણ વ્યાઘ્રાદિભયનિવારણ
સર્વશત્રુચ્છેદન મમ ત્રિભુવનસ્ત્રીપુન્નપુંસકાત્મકં સર્વજીવજાતં
વશય વશય । મમાજ્ઞાકારં સમ્પાદય નાનાનામધેયાન્
રાજ્ઞઃ સપરિવારાન્ કુરુ કુરુ સર્વવશ્ય અવિષાણ અવિષાણ
વિધ્વંસય વિધ્વંસય પ્રબલાનિ પરસૈન્યાનિ ક્ષોભય ક્ષોભય
સર્વકાર્યાણિ સાધય સાધય સર્વદુર્જનાનાં મુખાનિ સ્તમ્ભય કીલય ।
ઘે ઘે ઘે હા હા હા હું હું હું ફટ્ સ્વાહા ॥

(દીપદાનકાલે જપ્યમિદમ્ ।)

આચમ્ય પ્રાણાનાયમ્ય દેશકાલૌ સ્મૃત્વા મમ ઇહ જન્મનિ જન્માન્તરે
ચ અભીપ્સિતફલાવાપ્ત્યર્થં શ્રીરામરૂપિહનુમદ્દેવતાપ્રીત્યર્થં

મન્ત્રસિદ્ધ્યર્થં
પઞ્ચપલૈકતૈલેન યથાશક્તિ પઞ્ચપલમાનતામ્રપાત્રેણ
એકવિંશતિતન્તુનિર્મિતાભિસ્ત્રિભિર્વર્ત્તિભિર્નિત્યં દીપદાનમહં
કરિષ્યે ઇતિ સઙ્કલ્પ્ય ॥

સુમુખશ્ચૈકદન્તશ્ચેતિ પઠિત્વા પુણ્યાહં વાચયિત્વા ગણેશં સમ્પૂજ્ય
ગુરુચરણારવિન્દં ધ્યાત્વા,
ભક્ત્યા સમાગતોઽહં તે પાદયોર્ભક્તવત્સલ ।
દીપકાર્યં ચ ભવતા સમ્પાદ્યં વૈ નમો નમઃ ॥

ઇત્યાજ્ઞાં ગૃહીત્વા કપિલાગોમયોપલિપ્તભૂમૌ દીપયન્ત્રં વિલિખ્ય
રક્તચન્દનરક્તતણ્ડુલૈસ્તદ્યન્ત્રં સમ્પૂર્ય ।
યદ્વા ધાતુનિર્મિતયન્ત્રં ગોમયોપલિપ્તભૂમૌ નિધાય તન્મધ્યે
શ્રીરામરૂપિહનુમદ્દીપયન્ત્રરાજાય નમઃ ।
(મૂલં) દીપપ્રિયાય (ત્રિરાવૃત્તિ) નમઃ અગ્નીશાસુરવાયવ્યેષુ
હૃદયાદિ સમ્પૂજ્ય દિક્ષ્વસ્ત્રં ચ સમ્પૂજ્ય
યન્ત્રરાજમહારાજ હનુમત્પ્રિયકારક ।
દીપં સ્થાપય મદ્દત્તં મત્કામાન્પરિપૂરય ॥

ઇતિ મન્ત્રરાજં સમ્પ્રાર્થ્ય ।
ૐ હ્રૌં રામદૂતાય વિદ્મહે વાયુપુત્રાય ધીમહિ ।
તન્નો હનુમાન્ પ્રચોદયાત્ । ઇતિ ગાયત્રીમન્ત્રેણ
પાત્રમભિમન્ત્ર્ય તેનૈવ મૂલપૂર્વેણ દીપપાત્રં યન્ત્રોપરિ સ્થાપયેત્ ॥

ૐ હ્રાં હ્રીં હ્રૂં હનુમન્ એહિ એહિ મમ સન્નિધિં કુરુ કુરુ સ્વાહા ।
અનેન શુદ્ધતૈલેન પૂરયામિ જગત્પતે ।
શ્રીહનૂમન્ મહાવીર્ય કાર્યં સાધય મે નમઃ ॥

ઇતિ મન્ત્રેણ દીપપાત્રં તૈલેનાપૂર્ય તત્ર ચતુરઙ્ગુલાં સૂક્ષ્માગ્રાં
સ્થૂલમૂલાં સ્વર્ણાદિશલાકાં દક્ષિણતઃ ક્ષિપ્ત્વા
ૐ હ્રૌં હનુમન્વર્તિનં કલ્પય કલ્પય સ્વાહા ઇતિ કન્યાકરસ્પર્શિતે
યથાતન્તુનિર્મિતે વર્તિકે શ્રીહનુમતે ઇષ્ટાન્મત્કામાન્પરિપૂરયેતિ
વર્તિકં દીપાન્તરે નિક્ષિપ્ય
“ૐ હ્રૌં હનુમન્સન્ધુક્ષ્વ મમ ઈપ્સિતં સિદ્ધ્યતુ સ્વાહા ।
શ્રીહનુમન્મહાવીર્ય યોગજ્વલિતવિગ્રહ ।

ભવ સન્નિહિતો દેવ જ્વાલારૂપેણ વર્તિષુ ।
ૐ હ્રાં હ્રં હ્રૂં શ્રીહનુમન્મમ સમીહિતમુદ્દીપયોદ્દીપય હું ફટ્ સ્વાહા
રામપ્રિયાય હનુમતે વાતાત્મજાય ।
યથા દીપયતે દીપં તથા કાર્યં પ્રદીપય ।
ઇતિ પઠિત્વા મૂલપૂર્વકં ગાયત્ર્યા પ્રજ્વાલ્ય મૂલગાયત્રીભ્યાં
ત્રિધાભિમન્ત્ર્ય પ્રાણપ્રતિષ્ઠાં કુર્યાત્ ॥

ૐ આં હ્રીં ક્રોં યં રં લં વં શં ષં સં હં લં ક્ષં હંસઃ સોહં
દીપસ્ય પ્રાણા ઇહ પ્રાણાઃ (પુનસ્તાન્યુચ્ચાર્ય)
દીપસ્ય જીવ ઇહ સ્થિતઃ ।
(પુનસ્તાન્યુચ્ચાર્ય) દીપસ્ય સર્વેન્દ્રિયાણિ ।
(પુનસ્તાન્યુચ્ચાર્ય)
દીપસ્ય વાઙ્મનશ્ચક્ષુઃશ્રોત્રઘ્રાણપ્રાણા ઇહાગત્ય સુખં ચિરં
તિષ્ઠન્તુ સ્વાહા । ઇતિ ત્રિઃ પઠિત્વા પુનસ્તસ્મિન્નેવ
હનુમત્પ્રાણપ્રતિષ્ઠાં કૃત્વા પુનશ્ચ અકારાદિ ક્ષકારાન્તં
માતૃકયા મૂલેન ગાયત્ર્યા ચાભિમન્ત્ર્ય ગન્ધાદિ દત્વા
ન્યાસં કુર્યાત્ । મૂલેન પ્રાણાયામત્રયં કૃત્વા,
ૐ અસ્ય શ્રીદ્વાદશવર્ણાત્મકહનુમન્મન્ત્રસ્ય રામચન્દ્ર ઋષિઃ ।
જગતી છન્દઃ । હનુમાન્ દેવતા । હ્સૌં બીજમ્ । હસ્ફ્રેં શક્તિઃ ।
હૌં કીલકમ્ । દીપપૂજને વિનિયોગઃ ॥

રામચન્દ્રર્ષયે નમઃ શિરસિ ।
જગતીછન્દસે નમઃ મુખે ।
હનુમદ્દેવતાયૈ નમઃ હૃદિ ।
હ્સૌમ્બીજાય નમઃ ગુહ્યે ।
હસ્ફ્રેંશક્તયે નમઃ પાદયોઃ ।
હાંઐકીલકાય નમઃ સર્વાઙ્ગે । ઇતિ ઋષ્યાદિન્યાસઃ ।
હૌં અઙ્ગુષ્ઠાભ્યાં નમઃ ।
હસ્ફ્રેં તર્જનીભ્યાં નમઃ ।
ખ્ફ્રેં મધ્યમાભ્યાં નમઃ
હ્સ્રૌં અનામિકાભ્યાં નમઃ ।
હ્સ્ફ્રેં કનિષ્ઠિકાભ્યાં નમઃ ।
હ્સૌઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ । ઇતિ કરન્યાસઃ ।

હૌં હૃદયાય નમઃ ।
હ્સ્ફ્રેં શિરસે સ્વાહા ।
ખ્ફ્રેં શિખાયૈ વષટ્ ।
હ્સ્રૌં કવચાય હું ।
હ્સ્ખ્ફ્રેં નેત્રત્રયાય વૌષટ્ ।
હ્સૌં અસ્ત્રાય ફટ્ । ઇતિ હૃદયાદિ ન્યાસઃ ।
મૂલેન સર્વાઙ્ગે ।

અથાઙ્ગન્યાસઃ-
હૌં નમઃ મૂર્ધ્નિ ।
હ્સ્ફ્રેં નમઃ ભાલે ।
ખ્ફ્રેં નમઃ નેત્રયોઃ ।
હ્સ્રૌં નમઃ મુખે ।
હ્સ્ખ્ફ્રેં નમઃ કણ્ઠે ।
હ્સૌઃ નમઃ હસ્તદ્વયે ।

અક્ષરન્યાસઃ-
હનુમતે નમઃ જઙ્ઘયોઃ ।
નમોનમઃ પાદયોઃ ।
હં નમઃ હૃદિ ।
નું નમઃ ઉદરે ।
મં નમઃ નાભૌ ।
તેં નમઃ લિઙ્ગે ।
નં નમઃ જાન્વોઃ ।
મં નમઃ પાદયોઃ ।
મૂલેન વ્યાપકં વિધાય ।

ધ્યાનમ્ ।
અસ્ય શ્રીહનુમદ્દીપદાનમાલામન્ત્રસ્ય રામચન્દ્ર ઋષિઃ ।
હનુમાન્ દેવતા । દીપપ્રદાને પ્રયોગસિદ્ધ્યે જપે વિનિયોગઃ ।
રાં રીં રૂં રૈં રૌં રઃ
ઇત્યનેન કરષડઙ્ગન્યાસૌ કત્વા ।
ૐ હનુમતે નાથનાથાય અનન્તબાહવે સેતુબન્ધનાય રામપ્રિયાય
ભુભુક્કારેણ ૐ સ્વાહા । માલામન્ત્રકાર્યપરત્વેન યોજયિત્વા દીપદેવં

માનસૈરુપચારૈઃ સમ્પૂજ્ય અદ્ય શુભપુણ્યતિથૌ મમ
નિખિલોપદ્રવશાન્તિપૂર્વકં સકલાભીષ્ટસિદ્ધ્યર્થં
શ્રીરામરૂપિહનુમદ્દેવતાપ્રીત્યર્થં પઞ્ચ એકં વા યથાશક્તિ તૈલનિર્મિતં
પઞ્ચપલમિતતામ્રપાત્રસ્થિતં નિત્યદીપં શ્રીહનુમતે
શ્રીહનુમતઃ આવરણપૂજા સમ્પ્રદદે ન મમ ઇત્યાદિ દ્વાદશવર્ણાન્
હનુમતે અનાથનાથાય અનન્તબાહવે સેતુબન્ધનાય રામપ્રિયાય
વાયુપુત્રાય અઞ્જનીગર્ભરત્નાય હૂં હૌં ઇમં દીપં ગૃહાણ
સમ્પુટીકૃત્ય ૐ તં થં દં ધં નં પં ફં બં ભં મં ૐ સ્વાહા ।
સકૃજ્જપેત્ ।
મૂલમન્ત્રસ્ય પૂર્વોક્તન્યાસાન્ કુર્યાત્ ॥

---

From Hanumatstutimanjari, Mahaperiaval Publication
Proofread by PSA Easwaran psaeaswaran at gmail

---

*dIpadAnam*
pdf was typeset on February 25, 2025

Please send corrections to *sanskrit@cheerful.com*